श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयग्रीवदण्डकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

---

*The only printed source of this stotra (Kadamba Mālā, pp. 164–166) is in Tamil script, which does not distinguish aspirated, voiced and unvoiced consonants. The Devanagari text has been reconstructed with the help of grammar, metre and the Tamil commentary by Śrī M. S. Rājagopālācārya printed with it, and several words of the print have been emended where the metre or sense required it.*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयग्रीवदण्डकम् ॥

जय जय जय हे हयग्रीव सुग्रीवमुद्ग्रीवयन्
राममूर्त्याऽधिगत्याहवोत्साहवान् क्वापि
कुब्जे निकुञ्जे निलीय क्षणोन्मेषरोषोग्र -
दृक्कोणकाषायभामञ्जरीसञ्चरीजृम्भ -
दारुण्यशोणेन बाणेन वेगप्रवीणेन
घोरक्रियाशालिनं वालिनं यद्वदुद्वेलया
लीलयोन्मूलयामासिथ त्वं तथा मामकाव्यग्र -
जिह्वाग्रसिंहासने नित्यमत्यन्तनृत्यप्रवृत्त्या
वरीवृत्यमानस्सदा प्रोज्झिताभङ्गगङ्गा -
प्रवाहेण वाचां समूहेन तन्त्रस्वतन्त्रो -
ल्लसच्छेमुषीकल्पितानल्पसत्कल्पनाजल्पनाकल्प -
धाटीदुरूहेण कट् फट् जहि प्रौढगौडादि -
वादिव्रजं छिन्धि भिन्धि स्वभावप्रभावादविद्या -
मवद्यामवद्यानि दोषानशेषान् विभूषस्व
भाषस्व नः स्वाकृतेऽनाकृते ॥ 1 ॥

मम नम इदमृग्यजुस्सामरूपाय वेधःश्रुति -
प्रस्फुरत्कर्मणे तारकोद्गीतसद्धर्मणे
सन्महासैन्धवाग्रेसरास्याय मन्दाकिनीहार -
शैलामराहारमन्दारकुन्दारविन्दादयो
यद्यशःपूरकर्पूरपारम्परीसन्निधाने दधाना
मषीजालमालीमसीमासते भासते पुस्तकं

शस्तशङ्खं सचक्रं वलक्षोज्ज्वलाक्षस्फुरन् -
मालिकाऽनाद्यविद्यासमुन्मूलिका कामितस्तोम -
दानैकमुद्रा च यत्पाणिपद्मेषु यः स्वच्छ -
पङ्केजपर्यङ्कमध्यस्थितो राजते राजतेजस्समाजा -
श्रयः स्वाङ्कपर्यङ्किकाऽऽरूढलक्ष्मीकटाक्षो -
रुवक्षोरुहानन्दमन्दस्मितालापलीलापरिष्कार -
वीक्षाक्षणोत्कर्षहर्षोन्मदः ॥ 2 ॥

बहिरबहिरहो हयग्रीव गन्धो रसो रूपता
स्पर्शशब्दाविति ख्याततन्मात्रवर्गं पृथिव्यम्बु -
तेजोऽनिलव्योमवर्गं तवर्गं कवर्गं च ते
वैजयन्तीं जयन्तीं कलै रञ्जयन्तीमुरस्संस्मरामो
वचःपाणिपादं गुदोपस्थचक्षुश्श्रुतिघ्राण -
जिह्वात्वचं बाणवर्गं चवर्गं टवर्गं च ते
भावयामो मनश्चक्रमादाय चाहङ्कृती
शङ्खशार्ङ्गे निधाय स्फुरन्तं महान्तं
गदां तेऽनुसन्धाय लीलाविधानप्रधानं
प्रधानं भवद्वत्सलक्ष्यं विनिध्याय
जीवं च ते कौस्तुभं प्रत्नरत्नं विधाय
ब्रुवन्तः पवर्गं च ते सम्भजन्तोऽपवर्गं
यथोपास्महे त्वां तथा साहसौघे निदाघं
तवैकाक्षरं ब्रह्म जिह्वाग्रयन्त्रे समायन्त्रयेथा
महासिद्धिमुत्पादयेथा नमस्ते पुनस्ते नमः ॥ 3 ॥

नम इदमतिरम्यवेषाय हेषाविशेषातिघोषा -
रवाकृष्टदोषाचरात्तप्रमोषाखिलश्रौतभाषा -
मयात्मीययोषापुनस्सञ्जिहीर्षासमुद्भूततोषाय

सेवाबुभूषासमासक्तशेषाशनायातिशेषाहि -
तल्पाय दोषाकरोत्तंसभाषाशचीनामयोषाकरग्राहि -
मेषाश्वधौरेयपूषात्मजाम्भोधिपोषादि -
गीर्वाणकोटीरकोटीतटीविस्फुरत्प्रत्नरत्नप्रभा -
राजिनीराजितायानवद्यात्मविद्यासमुद्यान -
पद्यानिषद्यासमुद्यन्निदिध्यासनासार -
कासारभूसारहंसावतंसाय संसार -
हिंसारसातीतहंसातिसंसाधितान्तर्निनंसा -
रिरंसाप्रशंसापदायामृताटोपदायारमच्छ्रीमते
ह्रीमते श्रीनिवासाय विश्वानि गोपायते ॥ 4 ॥

॥ इति श्रीहयग्रीवदण्डकं समाप्तम् ॥